# কারকস্য সংক্ষিপ্তপ্রশ্নাবলী

১। প্রাতিপদিকম্ কিম্ ?

প্রতিপদ+ঠক্=প্রাতিপদিকম্। পদং পদং প্রতিপদম্। প্রতিপদং গৃহ্নাতীতি প্রাতিপদিকম্। ''অর্থবদধাতুরপ্রত্যয়ঃ প্রাতিপদিকম্'', ''কৃত্তদ্ধিতসমাসাশ্চ'' ইতি সূত্রদ্বয়েন পাণিনিনা প্রাতিপদিকসংজ্ঞা বিধীয়তে। ধাতুং প্রত্যয়ং প্রত্যয়ান্তং চ বর্জয়িত্বা অর্থবদ্ শব্দস্বরূপং প্রাতিপদিকসংজ্ঞং স্যাৎ ইতি, কৃত্তদ্ধিতান্তৌ সমাসাশ্চ প্রাতিপদিকসংজ্ঞাঃ স্যুঃ ইতি সূত্রদ্বয়ানাং অর্থঃ ভবতি।

''প্রাতিপদিকার্থলিঙ্গবচনসংখ্যামাত্রে প্রথমা''ইতি সূত্রেণ কৃদন্তানাং তদ্ধিতান্তাদিনাং শব্দানাং প্রাতিপদিকত্বাৎ প্রথমাবিভক্তিঃ সিধ্যতি। যথা- কারকঃ, ঔপগবঃ আদি উদাহরণাঃ। অর্থবদধাতুরপ্রত্যয়ঃ প্রাতিপদিকম্ ইতি সূত্রেণ রাজপুরুষঃ ইত্যাদিশব্দানাং প্রাতিপদিকসংজ্ঞাং প্রাপ্যতি।

২। প্রাতিপদিকার্থঃ কঃ?

প্রাতিপদিকস্য অর্থঃ প্রাতিপদিকার্থঃ। আচার্যেন ভট্টোজীদীক্ষিতমতেন-''নিয়তোপস্থিতিকঃ প্রাতিপদিকার্থঃ''। প্রাতিপদিকার্থে প্রথামা বিভক্তিঃ স্যাৎ। যথা-কৃষ্ণঃ, শ্রী, জ্ঞানম্।

৩। কিম্ কারকম্?

কৃ+ণ্বুল্(অক)=কারকম্। আচার্যেন পাণিনিনা কারকস্য কিমপি সামান্যলক্ষণম্ ন কৃতম্। অন্যে ব্যাকরণে ''ক্রিয়ান্বয়ি কারকম্'' এতদ্ লক্ষণম্ দৃশ্যতে। কৃ+ণ্বুল্(অক)=কারকম্,'করোতীতি কারকম'্ কারকস্য এতেন ব্যুৎপত্তিগতেন অর্থমধ্যেন ক্রিয়য়া সহ কারকস্য অন্বয়ঃ প্রকাশিতম্ ভবতি। ক্রিয়য়া সহ যস্য বিশেষসম্বন্ধঃ অন্তরঙ্গসম্বন্ধশ্চ দ্যোতিতঃ তদ্ কারকম্।

৪। প্রাতিপদিকার্থে কা বিভক্তিঃ ভবতি?

প্রাতিপদিকার্থে প্রথমা বিভক্তিঃ ভবতি।

৫। অলিঙ্গম্ কিম্? উদাহরণম্ প্রদীয়তাম্।

যেষাং শব্দানাং স্বেষাম্ লিঙ্গম্ নাস্তি, সর্বেষু লিঙ্গেষু যেষাং সমানং রূপং দৃশ্যতে তেষাম্ শব্দানাং অলিঙ্গসংজ্ঞা ভবতি। যথা-অব্যয় শব্দ।উচ্চৈঃ, নীচৈঃ ইত্যাদি।

৬। নিয়তলিঙ্গম্ কিম্?

যেষাম্ শব্দানাং লিঙ্গান্তরং ন ভবতি তেষাম্ নিয়তলিঙ্গসংজ্ঞা ভবতি। যথা-কৃষ্ণঃ(পুং), শ্রী(স্ত্রী), জ্ঞানম(ক্লীব)।

৭। অনিয়তলিঙ্গম্ কিম্?

একাধিকলিঙ্গে প্রযুক্তানাম্ শব্দানাম্ অনিয়তলিঙ্গসংজ্ঞা ভবতি। যতা-তটঃ, তটীঃ, তটম্।

৮। লিঙ্গমাত্রাধিক্যে প্রথমায়াঃ উদাহরণম্ প্রদীয়তাম্।

অনিয়তলিঙ্গশব্দঃ লিঙ্গমাত্রাধিক্যে প্রথমায়াঃ বিষয়ঃ। লিঙ্গমাত্রাধিক্যে প্রথমায়াঃ উদাহরণম্ তটঃ, তটী,তটম্।''অনিয়তলিঙ্গাস্তু লিঙ্গমাত্রাধিক্যস্য''। উদাহরণম্ তটঃ, তটী, তটম্।''

৯। পরিমাণমাত্রাধিক্যে প্রথমায়াঃ উদাহরণম্ প্রদীয়তাম্।

পরিমাণমাত্রাধিক্যে প্রথমায়াঃ উদাহরণম্ যথা-দ্রোণো ব্রীহিঃ। আচার্যেন ভট্টোজী দীক্ষিতেন আহ- ''পরিমাণমাত্রে দ্রোণো ব্রীহিঃ।''

১০। বচনমাত্রে প্রথমায়াঃ উদাহরণম্ প্রদীয়তাম্।

বচনমাত্রে প্রথমায়াঃ উদাহরণম্ যথা-একঃ, দ্বৌ, বহবঃ। আচার্যেন ভট্টোজী দীক্ষিতেন আহ-''বচনং সংখ্যা।'' একঃ, দ্বৌ, বহবঃ। ''ইই উক্তার্থত্বাদ্বিভক্তেরপ্রাপ্তৌ বচনম্।''

১১। ''দ্রোণো ব্রীহিঃ''-ইত্যস্য অর্থবিশ্লেষণং কুরু।

দ্রোণো ব্রীহিঃ ইত্যস্য অর্থঃ-দ্রোণরূপং যৎ পরিমাণং তৎপরিচ্ছিন্নো ব্রীহিরিত্যর্থঃ। অত্র 'দ্রোণঃ' ইতি শব্দে পরিমাণমাত্রাধিক্যে প্রথমা স্যুঃ।

১২। কারকম্ কতিবিধম্?
কারকম্ ষড়্বিধম্। যথা-কর্তৃকারকম্, কর্মকারকম্, করণকারকম্, সম্প্রদানকারকম্, অপাদানকারকম্ অধিকরণকারকম্ চ--

''কর্তা কর্ম চ করণং সম্প্রদানং ততঃপরম্।
অপাদানাধিকরণে কারকাণি ভবন্তি ষট্।।''

১৩। কা বিভক্তিঃ ? বিভক্তিঃ কতিবিধম্ ?

১৪। প্রথমায়াঃ অর্থঃ কতিবিধম্?
প্রথমায়াঃ অর্থঃ পঞ্চবিধম্ ভবতি। যথা-প্রাতিপদিকার্থে প্রথমা, লিঙ্গমাত্রাধিক্যে প্রথমা, পরিমাণমাত্রাধিক্যে প্রথমা, বচনমাত্রে প্রথমা, সম্বোধনে প্রথমা চ। পাণিনিনা সূত্রং কৃতম্-''প্রাতিপদিকার্থলিঙ্গপরিমাণবচনমাত্রে প্রথমা','সম্বোধনে চ''।

১৫। দ্বিতীয়ায়াঃ অর্থঃ কতিবিধম্।
দ্বিতীয়ায়াঃ অর্থঃ চতুর্বিধম্। যথা-কর্মে দ্বিতীয়া, অনীপ্সিতকর্মে দ্বিতীয়া, অন্তরা বহিযোগেশ্চ দ্বিতীয়া স্যাৎ।

১৬। চতুর্থ্যাঃ অর্থঃ কতিবিধম্।
চতুর্থ্যাঃ অর্থঃ দ্বিবিধম্। যথা-সম্প্রদানে চতুর্থী, তাদর্থ্যে চতুর্থীশ্চ।

১৭। পঞ্চম্যাঃ অর্থঃ কতিবিধম্?
পঞ্চম্যাঃ অর্থঃ দ্বিবিধম্। যথা-অপাদানে পঞ্চমী, হেত্বর্থে পঞ্চমী চ।

১৮। সপ্তম্যাঃ অর্থঃ কতিবিধম্?
সপ্তম্যাঃ অর্থঃ চতুর্বিধম্। যথা-অধিকরণে সপ্তমী, ভাবার্থে সপ্তমী, হেত্বর্থে সপ্তমী, নির্দ্ধারণে সপ্তমী চ।

১৯। সম্বোধনম্ কিম্? সম্বোধনে প্রথমায়াঃ উদাহরণম্ প্রদীয়তাম্।
অভিমুখীকৃত্য জ্ঞাপনং সম্বোধনম্। সম্বোধনে প্রথমা স্যাৎ। সম্বোধনে প্রথমায়াঃ উদাহরণম্ যথা-হে <u>রাম</u>!

২০। সম্বোধনে কিম্ বিভক্তিম্ ভবতি? সূত্রোল্লেখং কুরু।
সম্বোধনে প্রথমা বিভক্তিঃ ভবতি। সূত্রম্-''সম্বোধনে চ।''

২১। কর্তঃ সংজ্ঞাবিধায়কম্ সূত্রোল্লেখং কুরু।
কর্তঃ সংজ্ঞাবিধায়কম্ সূত্রং যথা-''স্বতন্ত্রঃ কর্তা''।

২২। কর্মকারকবিধায়কম্ প্রধানম্ সূত্রম্ কিম্ ? উদাহরণম্ প্রদীয়তাম্।
কর্মকারকবিধায়কম্ প্রধানম্ সূত্রম্-''কর্তরীপ্সিততমং কর্ম''। যেমন- পয়সা <u>ওদনং</u> ভুঙ্‌ক্তে।

২৩। কর্মকারকে কিম্ বিভক্তিম্ ভবতি? সুত্রোল্লেখম্ কুরু।
কর্মকারকে দ্বিতীয়া বিভক্তিঃ ভবতি। সূত্রম্-''কর্মণি দ্বিতীয়া।''

২৪। অনুক্তে কর্মণি কিম্ বিভক্তিম্ ভবতি? সূত্রোল্লেখম্ কুরু। উদাহরণম্ প্রদীয়তাম্।
অনুক্তে কর্মণি দ্বিতীয়া বিভক্তিঃ ভবতি। সূত্রম্-''কর্মণি দ্বিতীয়া।'' উদাহরণম্-<u>হরিং</u> ভজতি।

২৫। উক্তকর্মণি কিম্ বিভক্তিম্ ভবতি? উদাহরণম্ প্রদীয়তাম্।
উক্তকর্মণি ''প্রাতিপদিকার্থ-লিঙ্গ-পরিমাণ-বচনমাত্রে প্রথমা'' সূত্রানুসারে প্রথমা বিভক্তিঃ ভবতি। যথা-<u>হরিঃ</u> ভজ্যতে।

২৬। অভিধানম্ কিম্? উদাহরণম্ প্রদীয়তাম্।
পাণিনীয় ব্যাকরণে অভিধানম্ একম্ পারিভাষিকশব্দম্। অস্য অর্থঃ স্ফুটোক্তিঃ ব্যক্তিনির্দেশো বা। প্রায়েণ তিঙন্তেন, কৃদন্তেন, তদ্ধিতেন, সমাসেন চ অভিধানম্ ভবতি-''অভিধানঞ্চ প্রায়েণ তিঙ্-কৃত্তদ্ধিত -সমাসৈঃ।''(বার্তিক)। উদাহরণম্ যথাক্রমেণ-তিঙ্-<u>হরিঃ</u> সেব্যতে। কৃৎ-লক্ষ্ম্যা সেবিতো <u>হরিঃ</u>। তদ্ধিত- শত্যঃ <u>পটঃ</u>। সমাস-প্রাপ্তানন্দো <u>রামঃ</u>।

২৭। নিপাতেন অভিধানস্য উদাহরণম্ প্রদীয়তাম্।
''ক্বচিন্নিপাতেনাভিধানম্'' সূত্রানুসারে নিপাতেন অভিধানম্ ভবতি। উদাহরণম্ যথা-<u>বিষবৃক্ষো</u>ঽপি সংবর্ধ

স্বয়ং ছেত্তুমসাম্প্রতম্।

২৮। অনীপ্সিতকর্মণি দ্বিতীয়ায়াঃ উদাহরণম্ প্রদীয়তাম্ । সুত্রনির্দেশম্ কুরু।

অনীপ্সিতকর্মণি দ্বিতীয়ায়াঃ উদাহরণম্-ওদনং ভুঞ্জানো বিষং ভুঙ্ক্তে। গ্রামং গচ্ছন্ তৃণং স্পৃশতি।

সূত্রম্-''তথাযুক্তঞ্চানীপ্সিতম্।''

২৯। ''তথাযুক্তঞ্চানীপ্সিতম্'' সূত্রে 'অনীপ্সিতম্' শব্দস্য কোঽর্থঃ?

''তথাযুক্তঞ্চানীপ্সিতম্'' সূত্র অনীপ্সিতম্ শব্দস্য অর্থঃ ঈপ্সিতভিন্নম্। অনীপ্সিতকারকমপি কর্মসংজ্ঞং প্রাপ্যতে। অনীপ্সিতম্ দ্বিবিধম্। যথা-দ্বেষ্যম্ ঔদাসীন্যম্ চ। দ্বেষ্যম্ যথা-ওদনং ভুঞ্জানো বিষং ভুঙ্ক্তে। ঔদাসীন্যম্ যথা-গ্রামং গচ্ছন্ তৃণং স্পৃশতি।

৩০। অকথিতকর্মবিধায়কম্ সূত্রনির্দেশম্ কুরু।

অকথিতকর্মবিধায়কম্ সূত্রম্-''অকথিতঞ্চ''।

৩১। ''অকথিতঞ্চ'' ইতি সূত্রে 'অকথিত' শব্দস্য অর্থঃ কিম্?

''অকথিতঞ্চ'' ইতি সূত্রে 'অকথিতঃ' শব্দস্য অর্থঃ-ন কথিতঃ(বিবক্ষিতঃ)।

৩২। অকথিতকর্ম বা অপ্রধানকর্ম বা গৌণকর্ম কিম্?

অপাদানাদিভিঃ বিশেষৈঃ কারকৈঃ অবিবক্ষিতং কারকং কর্মসংজ্ঞং ভবতি। দুহাদীনাং দ্বাদশানাং তথা নী-প্রভৃতীনাং চতুর্ণাং কর্মণা যদ্যুজ্যতে তদেবাকথিতং কর্ম ইতি পরিগণনং কর্তব্যম্।

সূত্র-''অকথিতঞ্চ''।

৩৩। অকর্মকধাতুভিঃ যোগে কর্মসংজ্ঞকস্য উদাহরণম্ প্রদীয়তাম্।

অকর্মকধাতুভিঃ যোগে কর্মসংজ্ঞকস্য উদাহরণম্-কুরূন্ স্বপিতি। মাসম্ আস্তে। গোদোহম্ আস্তে।

''অকর্মকধাতুভিঃ যোগে দেশঃ কালো ভাবো গন্তব্যোঽধ্বা চ কর্মসংজ্ঞক ইতি বাচ্যম্।''

৩৪। প্রযোজ্যকর্মণঃ সংজ্ঞা প্রদীয়তাম্। প্রযোজ্যকর্মবিধায়কম্ সূত্রোল্লেখং কুরু।

অণিজন্তক্রিয়ায়াঃ কর্তা ণিজন্তাবস্থায়াম্ কর্মে সতি তৎ প্রযোজ্যকর্মসংজ্ঞা প্রাপ্তং ভবতি।

সূত্র-''গতি-বুদ্ধি-প্রত্যবসানার্থ-শব্দ কর্মাকর্মকাণামণিকর্তা স ণৌ।'' উদাহরণম্-শত্রূনগময়ৎ স্বর্গম্।

৩৫। অকর্মকধাতুভিঃ যোগে সকর্মকত্বপ্রাপ্তেঃ ক্ষেত্রাণাং উদাহরণসহকারেন বিশ্লেষণম্ কুরু।

অকর্মকধাতুভিঃ যোগে সকর্মকত্বপ্রাপ্তিবিষয়ে চতুর্বিধ ক্ষেত্রাঃ দৃশ্যন্তে। এতদ্ বিষয়ে কারিকা-

''ধাতোরর্থান্তরে বৃত্তেধাত্বর্থেনোপসংগ্রহাৎ।
প্রসিদ্ধেরবিবক্ষাতঃ কর্মণোঽকর্মিকা ক্রিয়া।।''

১) ধাতোঃ অর্থান্তরে-ভৃত্যঃ ভারং বহতি(সকর্মক), কিন্তু নদী বহতি বেগেন(অকর্মক)।

২) ধাত্বর্থেনোপোসংগ্রহাৎ-গৌঃ শব্দায়তে(অকর্মক)। ৩। প্রসিদ্ধেঃ-মেঘো বর্ষতি। ৪। অবিবক্ষাতঃ- মাতা পচতি।

৩৬। অষ্টাধ্যায়াম্ আধারে কর্মসংজ্ঞাবিধায়কম্ কতি সূত্রাঃ প্রাপ্যন্তে। উদাহরণম্ প্রদীয়তাম্।

অষ্টাধ্যায়াম্ আধারে কর্মসংজ্ঞাবিধায়কম্ ত্রীণি সূত্রাণি প্রাপ্যন্তে। ১। ''অধি-শীঙ্-স্থাসাং কর্ম'' (১।৪।৪৬)। ২।''অভিনিবিশশ্চ''(১।৪।৪৭), ৩।''উপান্বধ্যাঙ্ বসঃ'' (১।৪।৪৮)। যথা-শিশুঃ শয্যাম্ অধিতিষ্ঠতি।